दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-97

1 30.01.2024 मंगलवासरः वि.सं. २०८० माघकृष्ण पञ्चमी माघ १५ प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

विधायक- प्राथमिकतागोष्ठी- २०२४-२५ वर्षस्य कृते ९९९० कोटिरूप्यकाणां वार्षिकयोजना प्रस्ताविता- मुख्यमन्त्री 2




विधायक-विकासकोषः - राज्यसर्वकारेण १० जनपदेभ्यः मुक्तानि ३४.२९ कोटि रुप्यकाणि 3



बजटसत्रात् पूर्वं केन्द्रस्य सर्वदलीयसंगोष्ठी अद्य ; सर्वेषां दलानाम् नेतारः आमन्त्रिताः 4



## प्रतियोगिताः अपि जीवने प्रेरणादायकाः भवन्ति, परञ्च एतादृशी प्रतिस्पर्धा स्वस्था भवेत्-"परीक्षा-पे-चर्चा"





हिमसंस्कृतवार्ताः, नरेशमलोटिया। प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिव्यक्तं यत् प्रतियोगिताः अपि च सम्भावि-समस्याः जीवने प्रेरणादायकाः भवन्ति, परञ्च एतादृशी प्रतिस्पर्धा स्वस्था भवेत्। असौ छात्रैः सह कथितवान् यत् प्रतिस्पर्धा स्वात्मना भवेत् न तु परात्मना। नवदिल्ल्याम् अस्य वर्षस्य "परीक्षा-पे-चर्चा" इत्यस्य कार्यक्रमस्य माध्यमेन विद्यालयीय-छात्रैः शिक्षकैः अभिभावकैः च सह वार्ताविधौ प्रधानमन्त्री प्रावोचत् यत् यावत् जीवने समस्या नैव भवतु तावत् जीवनं प्रेरणारहितं मनोबलरहितं च भवति। मोदिना अग्रे कथितं यत् केचन् अभिभावकाः स्वीय- परिचय- प्रपत्रस्य स्वकीयस्य बालस्य अङ्कपत्रस्य च उपमितिं कुर्वन्ति। अयं व्यवहारः अनुचितो वर्तते। प्रधानमन्त्री अवोचत् यत् चिन्तायुताः बालाः प्रतिकूल- परिस्थिति- रहिताः भवेयुः, यतो हि मानसिक-पीडनं जीवनस्य अङ्गीभूतं भवति। विद्यार्थिनां मानसिक- पीडा- दूरीकरणे शिक्षकाणां भूमिका महत्वपूर्णा भवति। असौ अग्रे अवदत् यत् छात्र- अध्यापकयोः मध्ये सम्बन्धः पाठ्यक्रम- पाठ्यवृत्त इत्युभाभ्यां दूरे भूयात्। प्रधानमन्त्रिणा निगदितं यत् विद्यार्थिनां समस्यानां निवारणम् अभिभावकैः शिक्षकैश्च करणीयम्। प्रधानमन्त्री विद्यार्थिभ्यः समुचितस्वास्थाय अकथयत् यत् एतदर्थं संतुलिताहारः व्यायामश्च आवश्यकौ स्तः, यतोहि स्वस्थमस्तिष्काय स्वस्थशरीरस्य आवश्यकता वर्तते। अस्मिन् क्रमे पर्याप्तनिद्रापि अत्यावश्की वर्तते। नरेन्द्रमोदिना चर्चितं यत् विद्यार्थिनः निर्णयकुशलाः भवेत्। यदा भ्रमस्थितिः जायते तावत् समाधानार्थं चर्चा आवश्यकी, चर्चया सह समस्यातः अग्रेसरणमपि आवश्यकं भवति। भावि-परीक्षां निध्याय प्रधानमन्त्री समुदीरितवान् यत् छात्राः अत्यधिकं प्रश्नानाम् उत्तराणां लेखनाभ्यासं कुर्वन्तु। यदि अभ्यासो भवति तर्हि परीक्षा केन्द्रे छात्राः चिन्ताकुलाः नैव भविष्यन्ति। केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र प्रधानः भाषितवान् यत् राष्ट्रं युव-प्रतिभानां नेतृत्वे एकं विकसितराष्ट्रं भविष्यति। अनेन समुदीरितं यत् परीक्षा-पे-चर्चा इति कार्यक्रमः जनक्रान्तित्वेन जातः।

## जॉर्डनदेशे ईरान- समर्थितानां समूहानाम् आक्रमणेन ३ अमरीकीसैनिकाः व्यापादिताः, चतुस्त्रिंशत्- सैनिकाः च व्रणिताः जाताः



पूर्वोत्तरीय- जॉर्डनदेशे अमेरिकी- आवासे ईरान- समर्थितानां समूहानां ड्रोनइत्याख्ये आक्रमणे त्रयः अमरीकीसैनिकाः व्यापादिताः चतुस्त्रिंशत् सैनिकाः च व्रणिताः जाताः। इदं प्रथमवारमस्ति यत् यदा इजराइलदेशे विगतवर्षे अक्तूबरमासस्य सप्तमे दिनांके हमासस्य आक्रमणानन्तरं अस्मिन् स्थले जाते आक्रमणे अमरीकीसैनिकाः मारिताः। सैनिकानाम् आवासीयक्षेत्रेषु ड्रोनयन्त्रेण आक्रमणं जातम्, येन बृहत्तमसंख्यायां सैनिकाः व्रणिताः जाताः। राष्ट्रपतिः जो बाइडेनः अस्य आक्रमणस्य दोषि-अन्वेषणस्य वचनबद्धतां प्रकटितवान्। अमेरीकादेशस्य आधिकारिकसूत्रेण समुदीरितं यत् प्रहारोऽयम् गतरात्रौ सीरियादेशस्य सीमास्थिते टावर-ट्वेन्टी-टू इत्याख्ये एकस्मिन् लघु सीमदुर्गे संजातः।

## भारत- सऊदी-अरबयोः मध्ये संयुक्त- सैन्याभ्यासस्य उद्देश्यं अर्धमरूप्रदेशे द्वयोः पक्षयोः सैनिकानां प्रशिक्षणम् अस्ति- रक्षामंत्रालयः

संयुक्त- सैन्याभ्यासः 'सदा-तनसीक' इति भारत- सऊदी अरबयोः मध्ये राजस्थानप्रदेशे समारब्धः। रक्षामन्त्रालयेन उक्तं यत् पञ्चचत्वारिंशत्- सैन्यकर्मियुतस्य सऊदी-अरबदलस्य प्रतिनिधित्वं रॉयल सऊदी लैंड फोर्सेस इत्येषः करोति। भारतस्य पञ्चचत्वारिंशत्- सैन्यकर्मियुतस्य दलस्य प्रतिनिधित्वं ब्रिगेड ऑफ द गार्ड्स इत्येतस्य एका वाहिनी कुर्वन्ती अस्ति। अभ्यासोऽयम् अग्रिममासस्य दशदिनांकपर्यन्तं प्रचलिष्यति। रक्षा-मंत्रालयः उक्तवान् यत् अस्य अभ्यासस्य उद्देश्यम् अर्धमरूप्रदेशे संयुक्तसैन्याभ्यासाय द्वयोः पक्षयोः सैनिकानां प्रशिक्षणम् अस्ति।

## प्रवर्तननिदेशालयस्य भूमि- विनियम- वृत्यवसर- प्रवञ्चनायां राष्ट्रिय- जनता- दलस्य प्रमुखात् लालू प्रसादात् परिपृच्छा

प्रवर्तन निदेशालयस्य दलमेकं बिहार-राज्ये भूमि- विनियम- वृत्यवसर- प्रवञ्चनायां राष्ट्रिय- जनता- दलस्य प्रमुखेन लालू-प्रसादेन परिपृच्छां विहितवान्। लालूप्रसादः तस्य च पुत्री मीसा- भारती पटनानगरस्य प्रवर्तन- निदेशालयस्य कार्यालयं गतवन्तौ। बृहत्तमायां संख्यायां आर.जे.डी. इत्यस्य दलस्य समर्थकाः प्रवर्तन- निदेशालयस्य कार्यालयात् बहिः उपस्थिताः आसन्। इदं प्रथमवारमस्ति यदा केन्द्रीयाभिकरणेन पटनानगरे अस्मिन् प्रकरणे लालूप्रसादाय समाह्वानं सम्प्रेषितम्। केन्द्रीयान्वेषणाभिकरणेन भूमेः विनिमये वृत्यवसरः इत्यस्मिन् प्रकरणे आरोपपत्रमेकं समाविष्टम्। प्रवर्तन- निदेशालयः अस्य आरोप-पत्रस्याधारे धनशोधनप्रकरणस्य निरीक्षणं विदधाति।



ध्यातव्यम् अस्ति यत् इयं प्रवञ्चना चतुरधिकद्विसहस्र- तम- वर्षतः नवाधिक-द्विसहस्रतमवर्षं यावत्, तस्मिन् समये समुत्पन्ना। अस्मिन्नवधौ लालू- प्रसाद- यादवः संयुक्त-प्रगतिशील- गठबन्धस्य प्रशासने रेलमन्त्री आसीत्। लालूप्रसादः तस्य च पारिवारिक-सदस्याः अपि अस्मिन् प्रकरणे आरोपिणः सन्ति।

## वार्ताः चर्चासु

### उच्चशिक्षणसंस्थानेषु एकं पदमपि अनारक्षितवर्गे नैव करिष्यते- धर्मेन्द्रप्रधानः



शिक्षामन्त्रिणः स्पष्टीकृतं यत् उच्चशिक्षणसंस्थानेषु एकं पदमपि अनारक्षितवर्गे नैव करिष्यते यत् समाजस्य वंचितवर्गेभ्यः संवैधानिकरीत्या संरक्षितमस्ति। नवदिल्ल्यां वार्ताहरान् सूचयन् केन्द्रियशिक्षामन्त्री प्रधानः प्रत्यपादयत् यत् केन्द्रिय- शैक्षणिक-संस्थान- अधिनियमः नवदशाधिक-द्विसहस्रतमः इत्यस्य क्रियान्वयनस्य अनन्तरम् आरक्षणविषये अस्पष्टतायाः अवसरः नास्ति।

### झारखण्डस्य मुख्यमन्त्रिणः हेमन्त सोरेनस्य नवदिल्ल्याः आवासं सम्प्राप्तवान् प्रवर्तननिदेशालयः

प्रवर्तन निदेशालयस्य दलमेकं झारखण्डस्य मुख्यमन्त्रिणः हेमन्त-सोरेनस्य नवदिल्ल्याः आवासं सम्प्राप्तवान्। दलं तेन सेनायाः भूमेः अवैध - क्रय- विक्रयाभ्यां सम्बद्धेः धन-शोधन- प्रकरणे पृच्छां करिष्यति। निदेशालयेन पूर्वमेव अस्मिन् प्रसङ्गे अस्य मासस्य विंशतितारिकायां सोरेनेन सह रांची-स्थिते तस्य आवासेऽपि पृच्छा कृता।

## सुभाषितम्

**क्रोधो वैवस्वतो राजा**
**तृष्णा वैतरणी नदी।**
**विद्या कामदुघा धेनुः**
**सन्तोषो नन्दनं वनम् ॥**

भावार्थ- क्रोध यमराज के समान है और तृष्णा नरक की वैतरणी नदी के समान। विद्या सभी इच्छाओं को पूरी करने वाली कामधेनु है और संतोष स्वर्ग का नंदन वन है।

*प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
2 30.01.2024 मंगलवासरः वि.सं. २०८० माघकृष्ण पञ्चमी माघ १५ प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## विधायक- प्राथमिकतागोष्ठी- २०२४-२५ वर्षस्य कृते ९९९० कोटिरूप्यकाणां वार्षिकयोजना प्रस्ताविता- मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सोमवासरे २०२४-२५ वर्षस्य कृते विधायकानां प्राथमिकतानिर्धारणाय आयोजितायाः सभायाः अध्यक्षतां कृतवान्। प्रथमदिवसस्य प्रथमसत्रे ऊना, हमीरपुरम्, सिरमौर- जनपदानां विधायकानां प्राथमिकताविषये चर्चा कृता। मुख्यमन्त्री उक्तवान् यत् २०२४-२५ तमस्य वर्षस्य कृते वार्षिकयोजनायाः आकारः ९९८९.४९ कोटिरूप्यकाणि इति सर्वकारेण प्रस्तावितः। सुक्खुः अवदत् यत् राज्यसर्वकारः आगामिषु चतुर्षु वर्षेषु हिमाचलं स्वावलम्बी कृत्वा १० वर्षेषु देशस्य समृद्धतमराज्येषु अन्यतमं कर्तुं लक्ष्यं कृत्वा कार्यं कुर्वन् अस्ति। अस्यां सभायां चर्चातः वयं राज्ये विकासस्य दिशानिर्णयार्थं बहुमूल्यं मार्गदर्शनं प्राप्नुमः। वर्तमानसर्वकारः राज्यस्य सर्वेषां क्षेत्राणां समाजस्य सर्वेषां वर्गानां च द्रुतगतिना सन्तुलितविकासाय प्रतिबद्धः अस्ति। सः अवदत् यत् एतदर्थं राज्यसर्वकारेण काङ्ग्रेसपक्षस्य घोषणापत्रं नीतिगतप्रपत्ररूपेण स्वीकृत्य तस्य प्रभावी कार्यान्वयनार्थं दृढतया कार्यं क्रियते।



## विश्वबैङ्केन सह द्विसहस्रकोटिरूप्यकाणां ज्ञापनपत्रम्

मुख्यमन्त्री उक्तवान् यत् राज्यं हरित ऊर्जाराज्यरूपेण स्थापयितुं प्रभावी पदानि क्रियन्ते। अधुना विश्वबैङ्केन सह द्विसहस्रकोटिरूप्यकाणां ज्ञापनपत्रं कृतम्। एतेन सह आगामिषु पञ्चवर्षेषु जलविद्युत् नवीकरणीय ऊर्जाविकासकार्यक्रमस्य अन्तर्गतं राज्ये कार्यं भविष्यति। सः अवदत् यत् सामान्यतया विधायकानां प्राथमिकतानां वित्तपोषणं नाबार्ड- सञ्चालित- आरआईडीएफ- कार्यक्रमात् भवति। वर्षे २०२३-२४ मध्ये नाबार्डतः ९१८.८१ कोटिरूप्यकाणां अनुमोदनं कृतम्, यस्मिन् लोकनिर्माणविभागस्य ६२ विधायकप्राथमिकताः, जलशक्तिविभागस्य ९३ विधायकप्राथमिकताः च अनुमोदिताः सन्ति राज्यसर्वकारः मार्चमासपर्यन्तं नाबार्डद्वारा अधिकाः विधायकप्राथमिकताः अनुमोदयितुं प्रयतते। सः लोकनिर्माणविभागस्य जलशक्तिविभागस्य च अधिकारिभ्यः निर्देशं दत्तवान् यत् ते नाबार्डस्य अन्तर्गतं वित्तीयवर्षस्य २०२३-२४ बजटव्ययस्य पूर्णतया उपयोगं कुर्वन्तु। १५ मार्च २०२४ इत्यस्मात् पूर्वं नाबार्डकार्यालये प्रतिपूर्तिपत्राणि प्रस्तूयन्तु।

## एफसीए, एफआरए तथा उपहारपत्राणां समयेन समाधानं कुर्वन्तु अधिकारिणः- मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः

**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**

मुख्यमन्त्री प्रशासनिकसचिवेभ्यः विभागप्रमुखानाम् अधिकारिभ्यः च निर्देशं दत्तवान् यत् ते विधायकैः उत्थापितानां समस्यानां, उपालम्भानां च समाधाने कर्तुं कस्यापि प्रकारस्य शिथिलतां न दर्शयन्तु, तेषां बहुमूल्याय परामर्शाय च यथायोग्यं प्राधान्यं ददतु। विधायकैः दत्तानां योजनानां विस्तृतपरियोजनाप्रतिवेदनस्य निर्माणे विलम्बं न्यूनीकर्तुं सः अधिकारिणः एफसीए, एफआरए, गिफ्टडीड इत्यादीनाम् औपचारिकतानां समये समाधानं कर्तुं निर्देशं दत्तवान्। सः अवदत् यत् सम्बन्धितविभागैः उपायुक्तेन च प्रतिमासं स्वस्तरस्य प्राथमिकतानां समीक्षा करणीया, तस्य प्रतिवेदनं च सर्वकाराय प्रेषयितव्यम्।

## विधायकप्राथमिकता- गोष्ठी- ऊनाजनपदस्य विधायकानां प्राथमिकता

**ऊना-** ऊनायाः विधायकः सतपालसिंहः सत्ती पुरातनकार्याणां निवृत्तये पर्याप्तधनस्य प्रार्थनां कृतवान्। सः अवदत् यत् राज्यसर्वकारेण आपत्काले विधायकनिधिनियमेषु परिवर्तनं कृत्वा प्रभावितजनानाम् कृते सुरक्षाभीत्तिः (रिटेनिंग वॉल) इत्यादीनां कृते धनं दातुं प्रावधानं कृतम् अस्ति, यस्य विस्तारः २०२४ तमस्य वर्षस्य जूनमासात् परं कर्तव्यः।

**गगरेटम्-** गगरेट विधानसभानिर्वाचनस्य विधायकः चैतन्यशर्मा दौलतपुरचौकस्य महाविद्यालयं एवं विद्यालयं पृथक्-पृथक् परिसरे संचालयितुं निवेदितवान्। सः क्षेत्रे मादकद्रव्यस्य तस्कराणामुपरि अंकुशं स्थापयितुम् अयाचत्।

**कुटलैहड़म्-** कुटलैहड़क्षेत्रस्य विधायकः देवेन्द्रभुट्टोः क्रीडकेभ्यः आहारधनं वर्धयितुं क्रीडासङ्घस्य कार्येषु च पारदर्शितां आनेतुं च आग्रहं कृतवान्। निराश्रितपशूनां समर्थनार्थं दृढपदं स्वीकुर्वन्तु इति अपि सः आग्रहं कृतवान्।

## हमीरपुरजनपदस्य विधायकानां प्राथमिकताः

**भोरंजम्-** भोरंजविधानसभाक्षेत्रस्य विधायकः सुरेशकुमारः सीरनदस्य तटीकरणस्य याचनां कृतवान्। सः क्षेत्रे निर्माणाधीनस्य राष्ट्रियराजमार्गस्य निर्माणे गुणवत्तां सुनिश्चित्य विषयं उत्थाप्य भोरञ्जविद्यालये बहूद्देशीय भवनस्य निर्माणस्य आग्रहं कृतवान्।

**हमीरपुरम्-** हमीरपुरस्य विधानसभाक्षेत्रस्य विधायकः आशीषशर्मा मुख्यमन्त्रिणं प्रति आभारं प्रकटितवान् यत् सः हमीरपुरस्य नूतनबसस्थानकस्य कृते पर्याप्तं बजटं प्रदत्तवान्। सः हमीरपुरे पोलिक्लिनिकस्य उद्घाटनस्य, जिलामुख्यालयस्य नूतनं लघुसचिवालयस्य उद्घाटनस्य च आग्रहं कृतवान्।

**बड़सरम्-** बड़सरविधानसभाक्षेत्रस्य विधायकः इन्द्रदत्तः लखनपालः कृषकाणां लाभाय क्षेत्रे कृषिसिञ्चन- व्यवस्थायाः उन्नयनम् अयाचत्। सः विद्युतापूर्त्याः कृते आधारभूतसंरचनानां सुदृढीकरणाय, मार्गेषु समुचितजलनिकासी च कर्तुं, बिझड़ीक्षेत्रे पुलिसस्थानकस्य उद्घाटनस्य च आग्रहं कृतवान्।

## सिरमौर-जनपदस्य विधायकानां प्राथमिकताः

**पच्छादः-** पच्छादविधानसभाक्षेत्रस्य विधायक रीना कश्यप क्षेत्रे जलशक्ति मण्डलस्य उद्घाटनार्थं मुख्यमन्त्रिणं प्रति आभारं प्रकटितवती। क्षेत्रे पर्यटनस्य प्रवर्धनार्थं शिरगुलस्य भूरेश्वरमन्दिरस्य च अतिरिक्तं अन्यपर्यटनस्थलानां विकासाय सा आग्रहं कृतवती। सा सराहां- चण्डीगढ- मार्गस्य विस्तृतपरियोजना-प्रतिवेदनं शीघ्रमेव सज्जीकर्तुम् आग्रहं कृतवती।

**नाहनम्-** नाहनविधानसभाक्षेत्रस्य विधायकः अजय सोलंकी मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः क्षेत्रस्य विकासाय ३० कोटिरूप्यकाणां घोषणां कर्तुं धन्यवादं दत्तवान्। नाहनस्य डॉ. यशवंतसिंहपरमार-चिकित्सा-महाविद्यालये विशेषज्ञवैद्यानाम् उपचारिकाणां च पदानि पूरयितुं सः आग्रहं कृतवान्। सः भूमिहीनानां कृते गृहनिर्माणार्थं भूमिविनियोगस्य आग्रहं कृतवान्।

**पांवटा साहिबः-** पांवटासाहबस्य विधानसभाक्षेत्रस्य विधायकः सुखरामचौधरी अवदत् यत् सः हिमाचलस्य यमुनानद्याः सीमां निश्चेतुम् आग्रहं कृतवान् येन तत्र अवैधखननं स्थगितुं शक्यते। सः नलीकूपस्य चालनार्थं क्षेत्रस्य कृषकाणां कृते लम्बितविद्युत्संयोजनानि तत्काले प्रदातुं आग्रहं कृतवान्। पांवटासाहबनगरे यानस्थगनस्थलस्य (पार्किङ्ग) समस्यायाः समाधानं कर्तुं अपि आग्रहं कृतवान्।





## ई-टैक्सी एतदर्थं पटलं (पोर्टल) सज्जीकृत्य पञ्जीकरणं आरब्धम्- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः-




**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः जनहिताय निश्छलतया कार्यं कुर्वन् अस्ति, यत्र महिलाभिः, युवभिः, कृषकैः, कर्मचारिभिश्च सहितं समाजस्य सर्वेषां वर्गानां यथायोग्यं सम्मानं प्राप्यते। योजनानां, कार्यक्रमानां च लाभं अन्तिमव्यक्तिपर्यन्तं नेतुम् उद्दिश्य वर्तमानसर्वकारः परम्परातः पृथक् कार्यं कुर्वन् अस्ति इति सः अवदत्। विगत एकवर्षे सर्वकारेण तिस्रः प्रतिज्ञाः पूर्णाः कृताः सन्ति। पुरातनवृत्तियोजना प्रथमे एव मन्त्रिमण्डलसत्रे कार्यान्विता आसीत्। रोजगारसृजनस्य दृष्ट्या ६८० कोटिरूप्यकाणां राजीवगान्धी स्वरोजगारप्रारम्भयोजनायाः प्रथमचरणस्य ई-टैक्सीयोजना आरब्धा अस्ति। अस्याः योजनायाः अन्तर्गतं राज्यसर्वकारः ई-टैक्सी- क्रयणे यूनां कृते ५० प्रतिशतं अनुदानं प्रदाति। ई-टैक्सी कार्बन- उत्सर्जनस्य न्यूनीकरणं करिष्यति तथा च यूनां कृते नियत-आयः प्रदातुं सर्वेषु सर्वकारीयकार्यालयेषु अनुबन्ध- आधारेण ई-टैक्सी-यानानां संचालनं भविष्यति। एतदर्थं पटलं (पोर्टल) सज्जीकृत्य पञ्जीकरणं प्रारब्धम् अस्ति।

मुख्यमन्त्री उक्तवान् यत् मनरेगाकार्यकर्तॄणां दैनिकवेतनं २१२ रुप्यकात् २४० रुप्यकाणि यावत् वर्धितम्। राज्यसर्वकारेण ४००० अनाथबालानां 'राज्यस्य बालकाः' इति दत्तकग्रहणं कृतम् अस्ति। तेषां कल्याणाय कानूनम् निर्मीय मुख्यमन्त्री सुखाश्रयकोषस्य स्थापनां कृत्वा मुख्यमन्त्री सुखाश्रययोजना आरब्धा। कृषकाणां आयवर्धनार्थं दुग्धस्य क्रयमूल्यं ६ रुप्यकाणि वर्धितम् अस्ति। गतमानसूनकाले राज्यस्य इतिहासे बृहत्तमा आपदा अभवत् इति उक्तवान्। केन्द्रसर्वकारात् विशेषाश्रयसंकुलं न प्राप्य अपि राज्यसर्वकारेण सीमितसम्पदा सह प्रभावितजनानाम् कृते ४५०० कोटिरूप्यकाणां विशेषाश्रयसंकुलस्य प्रावधानं कृतम्। पूर्णतया क्षतिग्रस्तस्य गृहस्य क्षतिपूर्तिः सार्धपञ्चगुणं वर्धयित्वा १.३० लक्षरूप्यकात् ७ लक्षरूप्यकाणि यावत् अभवत्।

# विधायक-विकासकोषः - राज्यसर्वकारेण १० जनपदेभ्यः मुक्तानि ३४.२९ कोटि रुप्यकाणि



**हिमसंस्कृतवार्ता- शिमला।**

विधायकप्राथमिकतासमागमात् पूर्वं राज्यसर्वकारेण विधायकनिधेः चतुर्थांशं विमोचितम्। राज्यस्य १० जनपदेभ्यः आहत्य ३४.२९ कोटिरूप्यकाणि मुक्तानि सन्ति । तेषु ८१.६५ लक्षरूप्यकाणि मुख्यमन्त्री ग्रामपथयोजनायां व्ययितानि भविष्यन्ति। योजनापरामर्शकः डॉ. बासुसूदः किन्नौर-लहौल-स्पीति-व्यतिरिक्तेषु अन्येषु जनपदेषु उपायुक्तानां कृते विधायकनिधेः चतुर्थांशं विमोचितवान् अस्ति। आदिवासीजनपदेभ्यः पृथक् पृथक् धनं मुक्तं भविष्यति। उपायुक्तेभ्यः केवलं अनुमोदितानां योजनानां कृते एव धनस्य उपयोगं कर्तुं निर्देशः दत्तः अस्ति। मासिकं प्रगतिप्रतिवेदनं प्रतिमासस्य १० दिनाङ्के योजनाविभागाय प्रेषयितव्यं भविष्यति।

विधायक-विकासकोषनिधेः मुक्तमात्रेण भाजपाविधायकदलेन परिवर्तितः स्वनिर्णयः विधायकविकासकोषस्य विमोचनानन्तरं भाजपाविधायकदलेन अपि स्वनिर्णयस्य परिवर्तनं कृतम् अस्ति। भाजपाविधायकदलेन २८ जनवरीपर्यन्तं अन्तिमसमयः दत्तः आसीत् । अधुना भाजपा विधायकदलेन निर्णयः कृतः यत् अधुना सोमवासरात् आरभ्य विधायकप्राथमिकतासमागमेषु ते भागं ग्रहीष्यन्ति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः एकदिनपूर्वं स्पष्टं कृतवान् आसीत् यत् सः विधायककोषं न स्थगितवान्। सः पूर्वमुख्यमन्त्री जयरामठाकुरं पृष्टवान् आसीत् यत् सः तस्मै किमपि पत्रं अस्ति वा इति सूचयतु इति। भाजपा बहुवारं आरोपं कुर्वन् आसीत् यत् सर्वकारेण विधायकनिधिः स्थगितः इति।

## कस्मै कियत् कोषः

| जनपदः | कोषः |
|---|---|
| बिलासपुरम्- | २१०.०० लक्षरूप्यकाणि |
| चम्बा - | २२६.८० लक्षरूप्यकाणि |
| हमीरपुरम् - | २६२.५० लक्षरूप्यकाणि |
| काङ्गड़ा- | ७८७.५० लक्षरूप्यकाणि |
| कुल्लुः - | २१०.०० लक्षरूप्यकाणि |
| मण्डी- | ५२५.०० लक्षरूप्यकाणि |
| शिमला- | ४२०.०० लक्षरूप्यकाणि |
| सिरमौरम्- | २६२.५० लक्षरूप्यकाणि |
| सोलनम् - | २६२.५० लक्षरूप्यकाणि |
| ऊना - | २६२.५० लक्षरूप्यकाणि |

# 'दक्षिणाभिनेता-सूर्या' इत्यस्य चलचित्रे दर्शनं दास्यति जाह्नवी कपूरः



**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।**

'देवरा' इति चलचित्रस्य कारणात् अद्यकाले बॉलीवुडाभिनेत्री- जाह्नवी कपूरः वार्तायां वर्तते। अस्मिन् चलचित्रे जाह्नवी कपूरः दक्षिणस्य नामक- कनिष्ठ-एनटीआर इत्यनेन सह दृश्यमानः अस्ति। जाह्नवी कपूरः दक्षिणचलचित्रक्षेत्रे अस्मिन् चलच्चित्रेण पदार्पणं कर्तुं गच्छति। अतीव शीघ्रमेव एतत् चलच्चित्रं प्रदर्शितं भविष्यति। इदानीं दक्षिण-चलचित्रे जाह्नवी कपूरः दर्शनं दास्यति इति वार्ता आगच्छति। प्राप्तसमाचारानुसारं दक्षिणस्य बृहत्बजटस्य 'कर्ण' चलच्चित्रे जाह्नवी कपूरः दर्शनं दास्यति। परन्तु अस्मिन् विषये अद्यापि आधिकारिकं वक्तव्यं नास्ति। अस्मिन् चलचित्रे दक्षिणस्य सुपरस्टार 'सूर्या' इत्येन सह जाह्नवी कपूरः द्रष्टुं गच्छति। प्राप्तवार्तानुसारम् अस्य चलचित्रस्य निर्देशनं राकेश ओमप्रकाश मेहरा करिष्यति। चलच्चित्रे मुख्यनायिकायाः भूमिकायां जाह्नवी इत्यस्याः भूमिकायाः वार्ता अस्ति। राकेश ओमप्रकाश मेहरा इत्यनेन निर्देशितः सूर्या, जाह्नवी कपूरः च अभिनीतः 'कर्ण' चलचित्रं महाभारतस्य आधारेण निर्मितः भविष्यति। इदं पैन इण्डिया बृहत् बजट चलचित्रं भविष्यति। चलचित्रं द्वयोः भागयोः निर्मितं भविष्यति। अस्य च कारणात् चलचित्रस्य बजटम् अतीव अधिकं भविष्यति।

# प्राचार्यः प्रो.एम.सी.पाण्डे "उत्तराखण्ड-आईकॉन-अवार्ड 2024" द्वारा सम्मानितोभवत्




हिमसंस्कृतवार्ताः-डॉ. मूलचन्द्र-शुक्लः।रामनगरम्।

पीएनजी राजकीय- स्नातकोत्तर-महाविद्यालय-रामनगरस्य प्राचार्यः प्रोफेसर एम.सी.पाण्डे महोदयः शिक्षायाः क्षेत्रे उत्कृष्ट-उल्लेखनीय-कार्यार्थम् "उत्तराखण्ड आईकॉन अवार्ड 2024" इत्यनेन सम्मानेन सभाजितः।सम्माननमिदं प्रोफेसर पाण्डे महोदयेभ्यः उत्तराखण्ड बुक ऑफ रिकॉर्ड्स इत्यस्य सम्पादकेन डॉ.प्रमोद-कुमार-अग्रवाल- 'गोल्डी' महोदयेन स्वयमेव महाविद्यालयमागत्य प्रदत्तम्। डॉ. अग्रवाल महोदयः प्राचार्य- प्रोफेसर पाण्डे महोदयेभ्यो वर्धापनानि प्रयच्छन् अवोचत् यत् पाण्डेमहोदयस्य गुणात्मकशोधः,विविधलेखाः, समीक्षा,प्रशासनिक-कार्यदक्षता, शैक्षणिक-उन्नयनं कर्त्तव्यनिष्ठा च इत्यादीनि वैविध्यपूर्ण- विशिष्ट-अवदानानि अत्यन्तं प्रशंसापात्राणि वरीवृत्यन्ते।अस्मिन्नवसरे कुलानुशासकः प्रोफे.आर. डी.सिंहः,डॉ.आर.एस.कन्नौजिया,प्रोफे.एस.एस.मौर्यः, प्रोफे. जे.एस.नेगी, डॉ.प्रमोद जोशी, डॉ. शरदभट्टः, डॉ.निवेदिता अवस्थी, डॉ.योगेश चन्द्रः, डॉ.अल्का, डॉ.मूलचन्द्र- शुक्लः, डॉ.दीपक खाती, डॉ.डी.एन.जोशी, गोविन्द सिंह जङ्गपाङ्गी इत्यादयः प्राध्यापकाः शिक्षणेतरकार्मिकाश्च प्रोफेसर पाण्डे महोदयेभ्यः मुदितमनसा मङ्गलकामाः वर्धापनानि च दत्तवन्तः।

## उत्तराखण्डवार्ताः

# महामहिमराज्यपालसमक्षे रा.बा.इ.का.कोटद्वारस्य छात्राणां शकुन्तलाबुडाकोटीवर्यायाःनिर्देशने "महिलामतदाता जागरूकता तथा प्रयासः" पथनाटकम्

**हिमसंस्कृतवार्ताः-कुलदीपमैन्दोला।कोटद्वारम्।**

राष्ट्रीयमतदातादिवसावसरमुपलक्ष्य देहरादूनगांधीपार्क् इत्यत्र राज्यनिर्वाचन-आयोगद्वारा भव्यकार्यक्रमः समायोजितोभवत्। समारोहस्य मुख्यातिथिः महामहिमराज्यपालः लेफ्टिनेंटगुरमीतसिंहः कार्यक्रमे समुपस्थितः आसीत् । अत्र विभिन्नकार्यक्रमेषु निबन्धचित्रकलाश्लोगनादिप्रतियोगिताः अपि अभवन् अत्र प्रथमस्थानं प्राप्तकर्तृभ्यः प्रतिभागिभ्यः ५००० रुप्यकाणां धनराशिं प्रदाय प्रतिभागिनः सम्मानिताः अभवन् यत्र अटल-उत्कृष्ट-रा.इ.का.नौगांवखालतः हिन्दी प्रवक्ता रोशनबलूनी 511 श्लोगनप्रतिभागितायां प्रथमस्थानं प्राप्तवान्। वक्तव्यम् अस्ति यत् उपर्युक्तत्रिविधप्रतियोगितासु त्रयोदशजनपदेषु प्रथमः, द्वितीयः तृतीयः सुनिश्चिते राज्यस्तरे श्लोगनप्रतियोगितायां लछमपुरकोटद्वारनिवासी रोशनबलूनी प्रथमं स्थानं प्राप्तवान् ।

जागरूकतां वर्धयितुं उत्तराखण्डस्य प्रत्येकस्य जनपदस्य निर्वाचनाधिकारिणः स्तम्भाः प्रदर्शन्यः अपि सम्प्रदर्शिताः , येषु आदर्शमतदानकेन्द्राणां विषये सूचनाः दत्ताः, निर्वाचनायोगेन महिलानां, वृद्धानां, विकलाङ्गनाम् च कृते प्रदत्तानां सौविध्यानां विषये च सूचनाः दत्ताः। कार्यक्रमस्य कालखण्डे महामहिमराज्यपालः सर्वप्रदर्शनीनां भ्रमणं कुर्वन् आसीत्, तदा पौडीजनपदस्यस्य रा.बा.इ.का.कोटद्वारस्य छात्राः राज्यपालस्य सम्मुखे




"महिलामतदाता जागरूकता तथा प्रयासः" इति पथनाटकं कृतवत्यः, यस्य निर्देशनं विज्ञानशिक्षिका श्रीमती शकुन्तला बुडाकोटी इत्यनया कृतम् आसीत् । कार्यक्रमे राज्यनिर्वाचनायुक्तः चंद्रशेखरभट्टः, निर्वाचनसचिवः दिलीपजवालकरः, मुख्यनिर्वाचनाधिकारी डॉ.वी.षणमुगमः, अपरमुख्यनिर्वाचनाधिकारी विजयकुमारजोगदंडे, मुख्यशिक्षा-अधिकारी श्रीदिनेशचंद्रगौडः आदयश्च अधिकारिणः उपस्थिताः आसन्। कार्यक्रमस्य संचालनं प्रख्यातः उद्घोषकः श्री हेमन्तबिष्टः कृतवान् ।

# उत्तराखण्डे मुख्यसचिवस्य नियुक्तिविषये प्रचलन्ति अनुमानाः

मुख्यसचिवस्य डॉ. एस एस संधोः षड्मासात्मकं सेवाविस्तारः 31 जनवरी दिनाङ्के सम्पन्नः भविष्यति। मुख्यमन्त्री पुष्करसिंहधामीः अद्यापि कार्मिकविभागाय किमपि संकेतं न दत्तवान् यत् संधुः राज्यसचिवालयात् प्रस्थास्यति वा अन्यः विस्तारः प्राप्स्यति वा इति, परन्तु मुख्यसचिवपदार्थं सचिवालये द्वयोः नामयोः बहु चर्चा क्रियते। एतेषु प्रथमं नाम डॉ. संधुः अस्ति यः १९८८ तमस्य वर्षस्य क्रमाङ्कस्य आईएएस-अधिकारिः अस्ति। संधोः सेवानिवृत्तेः अनन्तरं षड्मासानां विस्तारं पूर्वमपि प्रदत्तम् । तस्मै सेवायां विस्तारं दातुं एकं मुख्यकारणं बद्रीनाथस्य केदारनाथधामस्य च पुनर्निर्माणपरियोजनानि सन्ति, यानि प्रधानमन्त्रिकार्यालयस्य सर्वोच्चप्राथमिकतासु मन्यन्ते। विशेषज्ञाः मन्यन्ते यत् यदि केनचित् कारणेन डॉ. संधुः सेवायां विस्तारं न प्राप्नोत् तथा अतिरिक्त मुख्यसचिवः राधा रतुड़ी मुख्यसचिवः भवितुमर्हति।

## ।। महाभारतकथा ।।

# युद्धस्य दशमः दिवसः, भीष्मस्य शरशय्या, कर्णभीष्मयोः संवादश्च ।




अर्जुनोऽपि युद्धस्य नवमे दिने भीष्मस्य बाणैः व्रणितः अभवत् । कृष्णस्य शरीराङ्गान्यपि भीष्मस्य शराणां प्रहारैः जर्जराणि जातानि । पीडितः श्रीकृष्णः प्रतिज्ञां विस्मृत्य रथस्य एकं चक्रं उद्धृत्य भीष्मस्य वधार्थं धावितवान्। अर्जुनेण रथात् उत्प्लुत्य कृष्णस्य पादौ आलिङ्ग्य येन केन प्रकारेण श्रीकृष्णं शान्तं कृतम् । सायंकाले आगते सति युद्धं स्थगितम्। युधिष्ठिरः रात्रौ युद्धहानौ विषये कृष्णेन सह परामर्शं कृतवान्। कृष्णः अवदत् यत् वयं भीष्मादेव तं युद्धे विरमतुं कोऽपि समाधानं याच्यामः। श्रीकृष्णः पाण्डवाश्च रात्रौ एव भीष्मस्य शिविरे समुपगत्य तस्य समक्षे समुपस्थिताः । उपाये विषये पृष्टे सति भीष्मः उवाच यावदहं जीवितोऽस्मि तावत् कौरवपक्षोऽजयः एवास्ति । पितामहः भीष्मः तस्य मृत्युरहस्यं प्रकटितवान् । तेन कथितं यत् द्रुपदस्य पुत्रः शिखण्डी पूर्वजन्मतः एव स्त्री अस्ति। सः मां मारयितुं शिवस्य तपस्या कृता आसीत् । द्रुपदस्य गृहे कन्या भूत्वा पुनरपि राक्षससाहाय्येन सः पुनः पुरुषः अभवत् । यदि अर्जुनः पुरतः सः ममोपरि बाणान् प्रहरति तर्हि अहं शस्त्रं न चालयिष्यामि। सर्वां वार्तां श्रुत्वा सर्वे पाण्डवाः निज शीविरे आगताः ।



प्रातःकालः अभवत् युद्धस्य दशमः दिवसः प्रारभत् शिखण्डी पाण्डवानां कृते भीष्मस्य पुरतः स्थितवान्, तं दृष्ट्वा भीष्मः स्वशस्त्राणि त्यक्तानि । कृष्णस्य आज्ञया अर्जुनः शिखण्डेः पृष्टतः भीष्मस्योपरि असंख्यैः बाणैः आक्रमणं कृतम् येन भीष्मस्य सम्पूर्णः शरीरः अमोघैः बाणैः बिद्धः । अन्ते च सः रथात् पतितः, परन्तु पृथिव्यां , निज शरीरे बिद्धैः बाणैः एव शय्या रूपे स्थितः । भीष्मस्य पतितमात्रेण उभयोः सेनयोः कोलाहलः विषादश्चाभवत् । कौरव-पाण्डवयोः मध्ये शोकः विस्तारितः । शरशय्यां पतितः भीष्मः अर्जुनं प्रति उवाच - अर्जुन! मम शिरः लम्बते तेनाहं कष्टमनुभवामि, किञ्चिदेतस्य समाधानं कुरु । शीघ्रमेव दुर्योधनः उपधानं आनयत्, परन्तु अर्जुनः भीष्मस्य शिरसा अधः त्रयः बाणाः तादृशरीत्या प्रक्षिप्ताः येभ्यः शिराश्रयः अभवत् । तदैव भीष्मः पुनः अवदत् भो वीराः ! अहं पिपासितोऽस्मि कुत्रापि जलमानयन्तु । दुर्योधनः स्वर्णपात्रे जलं आनयित्वा पितामहं प्रति प्रस्तौति , परन्तु भीष्मः अर्जुनमेव प्रति पुनरपि पश्यति । तस्मिन्नेव समये अर्जुनः गांडीवात् शरमेकं सन्धार्य पृथिव्यां प्रहारितं येन स्वच्छजलधारा एका बहिः निर्गता या जलधारा भीष्मस्य मुखे एव पतितुं आरब्धा । जलं पीत्वा भीष्मः कौरवपाण्डवयोः ततः गमनाय आदेशं दत्त्वा कथितं च यत् "सूर्ये उत्तरायणे आगते सः प्राणान् त्यागयिष्यति इति" ।

भीष्मस्य शरशय्या विषये श्रुत्वा कर्णः भीष्मं प्रति सर्वं वैरभावं विस्मृत्य पितामहस्य सम्मुखं आगच्छत्। सः पितामहं प्रणम्य सर्वां वार्तां पृच्छति । भीष्मः कर्णं प्रति आशीर्वचनं दत्त्वा पुनः अब्रवीत् - हे कर्ण ! इच्छति चेत् त्वं तर्हि त्वमेव युद्धं निवारणाय समर्थोऽसि यतोहि दुर्योधनः तव वचनानि मन्यते । सः इदं अवगच्छति यत् तव साहाय्येन सः विजयी भविष्यति, परन्तु सकृष्ण अर्जुनात् विजयः अत्र न सम्भवति अतो त्वं दुर्योधनं उपदिश । हे पुत्र कर्ण ! त्वं पाण्डवानां भ्राता कुन्तीपुत्रोऽसि| त्वमेव उभयोः पक्षयोः मध्ये शान्तिः स्थापनाय अलं असि । सर्वां भीष्मोक्तां वार्तां श्रुत्वा कर्णः अवदत् - हे पितामह ! यदि दुर्योधनः भवदुक्तिः न मन्यते तदानीं ममोक्तिं, मदुपदेशञ्च कथं ग्रहीष्यति । सम्प्रति संघर्षः दूरे आगतः अस्य विरमनम् असंभवो एवास्ति । इदमपि अहं वक्तुं शक्नोमि यत् इदानीं तु अहं सूत-अधिरथस्य एव पुत्रो एवास्मि । दुर्योधनः मम आपद् कालस्य मित्रं अस्ति तस्य तिरस्कारणाय समर्थः नास्मि । इत्युक्त्वा , प्रणम्य , पितामहस्य चरणयोः नत्वा आज्ञां च गृहीत्वा कर्णः स्वशिबिरं प्रत्यागतवान् ।

## मेलकोऽहम्



व्यूहसमुज्झितमेलकोऽहं,
स्वात्मनि भृशमेकलोऽहम्।
चेत्प्रतिष्ठागतवार्तां भणसि
बालैस्सममपि क्रीडितोऽहम्।।
व्यूहसमुज्झित.........

किं भवति हीरकमाणिक्यं
किञ्चेयं नन्विह नीलमणिः।
द्युतिरेषां पराजितं कृत्वा,
भास्करसमं द्युतिवन्तोऽहम्।।
व्यूहसमुज्झित.........

नगराजादपि समुच्चोऽहं,
जलराशेरपि विशालोऽहम्।
चेत्प्रतिष्ठागतवार्तां गदसि,
वृक्षेभ्योऽपि कुञ्चनशीलोऽहम्।।
व्यूहसमुज्झित.........

युद्धं भवतु वा भवतु विप्लवः,
नास्मि नितान्तमेकलोऽहम्।
आश्चर्ययुतो भविष्यसि तदा,
यदस्मि पिनाकिनश्शिष्योऽहम्।।
व्यूहसमुज्झित.........

**महेशनारायणशास्त्री**
**कुरेडा,टोङ्क, राजस्थानम्**

# विद्यालयस्य बालकानाम् उपरि शीततरङ्गस्य शीतस्य च प्रभावः, पटनायाः विद्यालयसमये परिवर्तनम्



**हिमसंस्कृतवार्ताः- कुणाल कौशिकः, मोतिहारी**

बिहारे शीतसदृशी स्थितिः अस्ति। अस्मिन् ऋतौ बालकाः सर्वाधिकं समस्यां प्राप्नुवन्ति। शीततरङ्ग कङ्कणीं च दृष्ट्वा पटनाजिलाप्रशासनेन ३१ जनवरीपर्यन्तं सर्वेषां विद्यालयानां समयः परिवर्तितः। पटनादेशस्य सर्वेषां सर्वकारीविद्यालयानाम् (पूर्वविद्यालयाः, आंगनबाडीकेन्द्राणि, प्रशिक्षणकेन्द्राणि च समाविष्टानि) सर्वकारीविद्यालयाः प्रातः ९ वादनतः अपराह्न ३.३० वादनपर्यन्तं शैक्षणिकक्रियाकलापाः करणीयाः इति अनिवार्यं कृतम्। प्रशासनिक- आदेशस्य अनुसारं विद्यालयाधिकारिभ्यः आदेशानुसारं शैक्षिककार्याणां समयं पुनः निर्धारयितुं निर्देशः दत्तः अस्ति। अस्मिन् दशमकक्षया सम्बद्धाः शैक्षणिकक्रियाकलापाः, बोर्डपरीक्षाः च मुक्ताः अभवन्।




# शेयरविपणिः उत्तमलाभेन सह स्थगितः अभवत्, यत्र सेन्सेक्सः १२४० अंकलाभेन स्थगितः तत्रैव निफ्टी ३८५ अंकलाभः अर्जितः

**हिमसंस्कृतवार्ताः** - दिलीपः, नादौनम्

२९ जनवरी दिनाङ्के सर्वेषु क्षेत्रेषु, प्रमुखेषु स्टॉकेषु च क्रयणं जातम्। निफ्टी, सेन्सेक्सः च प्रायः २ प्रतिशतं लाभेन सह समाप्तौ। दिवस-व्यापारस्य अन्ते सेन्सेक्सः ७१,९४१.५७ इति मूल्ये १,२४०.९० अंकाः अथवा १.७६ प्रतिशतं अधिकं वर्धितम्। तस्मिन् एव काले निफ्टी अपि ३८५.०० अंकाः अथवा १.८० प्रतिशतं लाभं प्राप्य २१,७३७.६० इति क्रमेण समाप्तम्। एशिया महाद्वीपस्य आण्पत्सु वृद्धेः पृष्ठे भारतीय-इक्विटी-सूचकाङ्कानां सशक्तः आरम्भः अभवत्। यथा यथा दिवसः प्रगच्छति स्म तथा तथा एव सेन्सेक्स-निफ्टी-इत्येतयोः क्रमशः ७२,०००, २१,७५० च स्तरं पारितम्। व्यापारस्य अन्ते ते दिवसस्य उच्चतमे स्तरे समीपे एव प्राप्य निमीलिताः

## सुवर्ण-रजतौ



अन्तरबैङ्क विदेशी विनिमय विपण्यां रुप्यकस्य मूल्यं प्रतिडॉलरं ८३.१४ इति मूल्ये प्रारब्धम् । व्यापारस्य समये ८३.१३ उच्चतमं, ८३.१५ प्रति डॉलरस्य न्यूनतमं च स्पर्शं कृत्वा अन्ततः ८३.१४ (अस्थायी) प्रति डॉलरं यावत् समाप्तम्, यत् पूर्वसमाप्तेः अपेक्षया त्रयः पैसाः न्यूनम् अभवत्।

# ऊर्जापूर्तिसमस्यया ग्रस्तेन जापानदेशस्य चन्द्र- अवतरकेण सप्ताहानन्तरं प्रचालनं पुनः समारब्धम्



ऊर्जापूर्ति-समस्यया ग्रस्तेन जापानदेशस्य चन्द्र- अवतरकेण सप्ताहानन्तरं प्रचालनं पुनः समारब्धम्। चन्द्रावरोहणतः समारब्धस्य नवदिवसीयस्य आशंकानन्तरं, जापान- आंतरिक- अन्वेषण- अभिकरणेन साफल्येन 'मून-स्लिम' इत्येतस्य अन्वेषणाय स्मार्ट- अवरोहकेण सह संपर्कः स्थापितः। ध्यातव्यम् अस्ति यत् जनवरी- मासस्य विंशतिः दिनांके यदा चन्द्रतले अवरोहणं जातं तदा सूर्यप्रकाशात् विमुखीकरणेन अवरोहकयानं ऊर्जोत्पादनं कर्तुं सक्षमं नासीत्।

# बजटसत्रात् पूर्वं केन्द्रस्य सर्वदलीयसंगोष्ठी अद्य ;

### सर्वेषां दलानाम् नेतारः आमन्त्रिताः

केन्द्रीयसंसदीयकार्यमन्त्री प्रह्लादजोशी मंगलवासरे भवितायाः सर्वदलीयसंगोष्ठ्याः कृते सर्वेषां दलानाम् सदस्यान् नेतृन् आमन्त्रितवान्। अस्मिन् वर्षे अप्रैल-मई मासे भविते निर्वाचनात् पूर्वमेव वर्तमानलोकसभायाः अन्तिमं संसदसत्रं भविष्यति।



केन्द्रसर्वकारेण ३१ जनवरीतः आरभ्यमाणस्य बजटसत्रस्य पूर्वं मंगलवासरे सर्वदलीयसमागमः आहूतः। संसदस्य प्रत्येकं सत्रस्य आरम्भात् पूर्वं आयोजिते अस्मिन् पारम्परिकसमागमे संसदस्य द्वयोः सदनयोः सर्वेषां दलानाम् नेतारः आमन्त्रिताः सन्ति । अस्मिन् सत्रे सत्रस्य कार्यसूची सर्वकारेण विपक्षेण सह सार्वजनिका भवति। एतदतिरिक्तं सदनस्य सुचारुकार्यं कर्तुं विपक्षस्य सहकार्यं याच्यते।